दिनाङ्क :-17.12.2025

प्रात: - 06:55

## प्रधानमन्त्री - निशान पुरस्कार

इथियोपिया-प्रधानमन्त्री डॉ. अबी अहमदः, भारत-इथियोपिया-सहयोगस्य सुदृढीकरणार्थम् असाधारण-योगदानाय, एवं च, वैश्विक-नेतृरूपेण दूरदर्शी नेतृत्वस्य निर्वहनाय, इथियोपियादेशस्य सर्वोच्चं "निशान-पुरस्कारं" प्रधानमन्त्रिणे नरेन्द्रमोदिने प्रदाय सम्मननं कृतवान् । अवधेयं यत्, प्रधानमन्त्री श्रीमोदी प्रथमः वैश्विकः, सर्वकारप्रमुखः, अस्ति, यः एतत् पुरस्कारं प्राप्तवान् । श्रीमोदी अवदत् यत्, भारत-इथियोपिया-सहयोगस्य सुदृढीकरणार्थम् ये भारतीयाः सहयोगं कृतवन्तः तेभ्यः एतत् सम्मानं समर्प्यते ।

## प्रधानमन्त्री नरेन्द्र मोदी - इथियोपिया

इतः पूर्वं, प्रधानमन्त्री श्रीनरेन्द्रमोदी, इथियोपिया-देशस्य राजधान्याम्, अदीस् अबाबानगरे इथियोपिया-देशस्य प्रधानमन्त्री डॉ. अबी अहमद अली इत्यनेन सह अनेकविषयेषु वार्तां कृतवान् । द्वयोः देशयोः मध्ये, द्वयोः नायकयोः उपस्थितौ त्रीणि ज्ञापनपत्राणि हस्ताक्षरितानि । एतेषु सीमाशुल्ककार्ये प्रशासनिक-सहायता, इथियोपियादेशस्य दूतावासे डेटा-सेण्टर्-केन्द्रस्य स्थापना, संयुक्तराष्ट्र-सङ्घस्य शान्तिरक्षणे सहकार्यं च अन्तर्भवन्ति । अस्मिन् अवसरे प्रधानमन्त्री मोदी, अवदत् यत्, वयं भारत-इथियोपिया-सम्बन्धं सामरिक-सहयोग-स्तरं प्रति नयामः ।

## प्रधानमन्त्री-ओमान

इतः परम्, प्रधानमन्त्री मोदी स्व-यात्रायाः अन्तिमपदे अद्य ओमानदेशं आगमिष्यति । इयं यात्रा, ओमानस्य सुल्तान, हैथम् - बिन् - तारिकस्य आमन्त्रणेन भवति । अस्मिन् वर्षे उभयोः देशयोः

कूटनीतिकसम्बन्धस्य सप्तति वर्षाणि पूर्णानि भवन्ति इत्यतः, प्रधानमन्त्रिणः ओमान-देशस्य भ्रमणम् अत्यन्तं महत्त्वपूर्णं मन्यते ।

## राष्ट्रपति तमिलनाडु भ्रमण

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य वेल्लोर-नगरस्य श्रीपुरम स्वर्णमन्दिरस्य यात्रां करिष्यति । सा मन्दिरे आयोजित-कार्यक्रमे भागं गृह्णाति । तत्र स्थिते मन्दिर-परिसरे सा वृक्षम् अपि रोपयिष्यति । कार्यक्रमस्य अनन्तरं राष्ट्रपतिः तिरुपतिं प्रति प्रस्थास्यति। तमिलनाडु राज्यपालः आर.एन.रविः अथ सूचनाप्रसारण-राज्यमन्त्री डॉ. एल.मुरुगनः अपि कार्यक्रमे भागं गृहीष्यतः ।

## आयुष प्रदर्शनी

अद्यारभ्यः नवदिल्लीनगरे पारम्परिक-चिकित्सा-विषये द्वितीयं वैश्विक-शिखर-सम्मेलनं आरभ्यते । अस्य आयोजनं विश्वस्वास्थ्य-संघटनेन आयुष-मन्त्रालयेन च संयुक्तरूपेण क्रियते । अस्य वर्षस्य विषयः वर्तते यत्, " स्वास्थ्यस्य, कल्याणस्य च विज्ञानम्-अभ्यासश्च - एतेषु सन्तुलनस्य पुनः स्थापनम्" इति ।

## दिल्लीसर्वकारः

दिल्लीसर्वकारेण राष्ट्रराजधान्यां वायुप्रदूषण-नियन्त्रणाय कठिन-क्रमाणां क्रियान्वयनं कृतम् । वार्ताहरान् सम्बोधयन् दिल्ली-पर्यावरणमन्त्री मञ्जिन्दर-सिंह-सिरसा, उक्तवान् यत्, श्वः आरभ्य समुचितं प्रदूषण-नियन्त्रण-प्रमाणपत्रं विना वाहनानां कृते, पेट्रोल-पम्प इत्यत्र, ईन्धनं न प्रदास्यते । मन्त्री घोषितवान् यत् दिल्लीनगरे निर्माण-सामग्रीम् आनयितुं ट्रक-वस्तुवाहनानां सम्पूर्णप्रतिबन्धः भविष्यति । अपि च, दिल्लीतः बहिस्तात् BS6 श्रेणीतः न्यूनानि वैयक्तिक-वाहनानि श्वः आरभ्य राष्ट्रियराजधान्यां प्रवेशं न प्राप्नुयुः।

## पुरुषक्रिकेट्

पुरुषक्रिकेट्-क्रीडायां, भारत-दक्षिणा-आफ्रिकायोः मध्ये चतुर्थ-टी-२० इति अन्ताराष्ट्रिय-क्रिकेट्-क्रीडा अद्य लखनौ नगरस्य भारतरत्न-श्री-अटल-बिहारी-वाजपेयी-एकाना-क्रिकेट-क्रीडांगणे भविष्यति । इयं क्रीडा सायं सप्तवादने आरप्स्यते । अवधेयं यत्, पञ्चक्रीडा-श्रंखलायां भारतं द्वे-एकम् इत्यंक-अन्तरालेन अग्रे वर्तते ।